# Shvetashvatara Upanishad

# શ્વેતાશ્વતરોપનિષત્

## Document Information

Text title : shvetaashvataropaniShat

File name : shveta.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic Rishis

Transliterated by : Sunder Hattangadi

Proofread by : John Manetta

Description-comments : 14/108; Krishna YajurVeda, Samanya upanishad

Latest update : July 20, 1999, February 21, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્વેતાશ્વતરોપનિષત્

ૐ સહનાવવતુ । સહ નૌ ભુનક્તુ ।
સહ વીર્યં કરવાવહૈ ।
તેજસ્વિ નાવધીતમસ્તુ । મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

પ્રથમોઽધ્યાયઃ ।

હરિઃ ૐ ॥ બ્રહ્મવાદિનો વદન્તિ ।

કિં કારણં બ્રહ્મ કુતઃ સ્મ જાતા
જીવામ કેન ક્વ ચ સમ્પ્રતિષ્ઠા ।
અધિષ્ઠિતાઃ કેન સુખેતરેષુ
વર્તામહે બ્રહ્મવિદો વ્યવસ્થામ્ ॥ ૧॥

કાલઃ સ્વભાવો નિયતિર્યદૃચ્છા
ભૂતાનિ યોનિઃ પુરુષ ઇતિ ચિન્ત્યા ।
સંયોગ એષાં ન ત્વાત્મભાવા-
દાત્માપ્યનીશઃ સુખદુઃખહેતોઃ ॥ ૨॥

તે ધ્યાનયોગાનુગતા અપશ્યન્
દેવાત્મશક્તિં સ્વગુણૈર્નિગૂઢામ્ ।
યઃ કારણાનિ નિખિલાનિ તાનિ
કાલાત્મયુક્તાન્યધિતિષ્ઠત્યેકઃ ॥ ૩॥

તમેકનેમિં ત્રિવૃતં ષોડશાન્તં
શતાર્ધારં વિંશતિપ્રત્યરાભિઃ ।
અષ્ટકૈઃ ષડ્ભિર્વિશ્વરૂપૈકપાશં
ત્રિમાર્ગભેદં દ્વિનિમિત્તૈકમોહમ્ ॥ ૪॥

પઞ્ચસ્રોતોમ્બું પઞ્ચયોન્યુગ્રવક્રાં

પઞ્ચપ્રાણોર્મિં પઞ્ચબુદ્ધ્યાદિમૂલામ્ ।
પઞ્ચાવર્તાં પઞ્ચદુઃખૌઘવેગાં
પઞ્ચાશદ્ભેદાં પઞ્ચપર્વામધીમઃ ॥ ૫॥

સર્વાજીવે સર્વસંસ્થે બૃહન્તે
અસ્મિન્ હંસો ભ્રામ્યતે બ્રહ્મચક્રે ।
પૃથગાત્માનં પ્રેરિતારં ચ મત્વા
જુષ્ટસ્તતસ્તેનામૃતત્વમેતિ ॥ ૬॥

ઉદ્ગીતમેતત્પરમં તુ બ્રહ્મ
તસ્મિંસ્ત્રયં સુપ્રતિષ્ઠાઽક્ષરં ચ ।
અત્રાન્તરં બ્રહ્મવિદો વિદિત્વા
લીના બ્રહ્મણિ તત્પરા યોનિમુક્તાઃ ॥ ૭॥

સંયુક્તમેતત્ ક્ષરમક્ષરં ચ
વ્યક્તાવ્યક્તં ભરતે વિશ્વમીશઃ ।
અનીશશ્ચાત્મા બધ્યતે ભોક્તૃ-
ભાવાજ્ જ્ઞાત્વા દેવં મુચ્યતે સર્વપાશૈઃ ॥ ૮॥

જ્ઞાજ્ઞૌ દ્વાવજાવીશનીશાવજા
હ્યેકા ભોક્તૃભોગ્યાર્થયુક્તા ।
અનન્તશ્ચાત્મા વિશ્વરૂપો હ્યકર્તા
ત્રયં યદા વિન્દતે બ્રહ્મમેતત્ ॥ ૯॥

ક્ષરં પ્રધાનમમૃતાક્ષરં હરઃ
ક્ષરાત્માનાવીશતે દેવ એકઃ ।
તસ્યાભિધ્યાનાદ્યોજનાત્તત્ત્વ-
ભાવાત્ ભૂયશ્ચાન્તે વિશ્વમાયાનિવૃત્તિઃ ॥ ૧૦॥

જ્ઞાત્વા દેવં સર્વપાશાપહાનિઃ
ક્ષીણૈઃ ક્લેશૈર્જન્મમૃત્યુપ્રહાણિઃ ।
તસ્યાભિધ્યાનાત્તૃતીયં દેહભેદે
વિશ્વૈશ્વર્યં કેવલ આપ્તકામઃ ॥ ૧૧॥

એતજ્જ્ઞેયં નિત્યમેવાત્મસંસ્થં
નાતઃ પરં વેદિતવ્યં હિ કિઞ્ચિત્ ।
ભોક્તા ભોગ્યં પ્રેરિતારં ચ મત્વા

સર્વં પ્રોક્તં ત્રિવિધં બ્રહ્મમેતત્ ॥ ૧૨॥

વહ્નેર્યથા યોનિગતસ્ય મૂર્તિર્ન
દૃશ્યતે નૈવ ચ લિઙ્ગનાશઃ ।
સ ભૂય એવેન્ધનયોનિગૃહ્ય-
સ્તદ્વોભયં વૈ પ્રણવેન દેહે ॥ ૧૩॥

સ્વદેહમરણિં કૃત્વા પ્રણવં ચોત્તરારણિમ્ ।
ધ્યાનનિર્મથનાભ્યાસાદેવં પશ્યેન્નિગૂઢવત્ ॥ ૧૪॥

તિલેષુ તૈલં દધિનીવ સર્પિ-
રાપઃ સ્રોતઃસ્વરણીષુ ચાગ્નિઃ ।
એવમાત્માઽત્મનિ ગૃહ્યતેઽસૌ
સત્યેનૈનં તપસાયોઽનુપશ્યતિ ॥ ૧૫॥

સર્વવ્યાપિનમાત્માનં ક્ષીરે સર્પિરિવાર્પિતમ્ ।
આત્મવિદ્યાતપોમૂલં તદ્બ્રહ્મોપનિષત્ પરમ્ ॥ ૧૬॥

દ્વિતીયોઽધ્યાયઃ ।

યુઞ્જાનઃ પ્રથમં મનસ્તત્ત્વાય સવિતા ધિયઃ ।
અગ્નેર્જ્યોતિર્નિચાય્ય પૃથિવ્યા અધ્યાભરત્ ॥ ૧॥

યુક્તેન મનસા વયં દેવસ્ય સવિતુઃ સવે ।
સુવર્ગેયાય શક્ત્યા ॥ ૨॥

યુક્ત્વાય મનસા દેવાન્ સુવર્યતો ધિયા દિવમ્ ।
બૃહજ્જ્યોતિઃ કરિષ્યતઃ સવિતા પ્રસુવાતિ તાન્ ॥ ૩॥

યુઞ્જતે મન ઉત યુઞ્જતે ધિયો
વિપ્રા વિપ્રસ્ય બૃહતો વિપશ્ચિતઃ ।
વિ હોત્રા દધે વયુનાવિદેક
ઇન્મહી દેવસ્ય સવિતુઃ પરિષ્ટુતિઃ ॥ ૪॥

યુજે વાં બ્રહ્મ પૂર્વ્યં નમોભિર્વિશ્લોક
એતુ પથ્યેવ સૂરેઃ ।
શ઼ૃણ્વન્તુ વિશ્વે અમૃતસ્ય પુત્રા આ યે
ધામાનિ દિવ્યાનિ તસ્થુઃ ॥ ૫॥

અગ્નિર્યત્રાભિમથ્યતે વાયુર્યત્રાધિરુધ્યતે ।
સોમો યત્રાતિરિચ્યતે તત્ર સઞ્જાયતે મનઃ ॥ ૬॥

સવિત્રા પ્રસવેન જુષેત બ્રહ્મ પૂર્વ્યમ્ ।
યત્ર યોનિં કૃણવસે ન હિ તે પૂર્તમક્ષિપત્ ॥ ૭॥

ત્રિરુન્નતં સ્થાપ્ય સમં શરીરં
હૃદીન્દ્રિયાણિ મનસા સન્નિવેશ્ય ।
બ્રહ્મોડુપેન પ્રતરેત વિદ્વાન્
સ્રોતાંસિ સર્વાણિ ભયાનકાનિ ॥ ૮॥

પ્રાણાન્ પ્રપીડ્યેહ સંયુક્તચેષ્ટઃ
ક્ષીણે પ્રાણે નાસિકયોચ્છ્વસીત ।
દુષ્ટાશ્વયુક્તમિવ વાહમેનં
વિદ્વાન્ મનો ધારયેતાપ્રમત્તઃ ॥ ૯॥

સમે શુચૌ શર્કરાવહ્નિવાલિકા-
વિવર્જિતે શબ્દજલાશ્રયાદિભિઃ ।
મનોનુકૂલે ન તુ ચક્ષુપીડને
ગુહાનિવાતાશ્રયણે પ્રયોજયેત્ ॥ ૧૦॥

નીહારધૂમાર્કાનિલાનલાનાં
ખદ્યોતવિદ્યુત્સ્ફટિકશશીનામ્ ।
એતાનિ રૂપાણિ પુરઃસરાણિ
બ્રહ્મણ્યભિવ્યક્તિકરાણિ યોગે ॥ ૧૧॥

પૃથિવ્યપ્તેજોઽનિલખે સમુત્થિતે
પઞ્ચાત્મકે યોગગુણે પ્રવૃત્તે ।
ન તસ્ય રોગો ન જરા ન મૃત્યુઃ
પ્રાપ્તસ્ય યોગાગ્નિમયં શરીરમ્ ॥ ૧૨॥

લઘુત્વમારોગ્યમલોલુપત્વં
વર્ણપ્રસાદઃ સ્વરસૌષ્ઠવં ચ ।
ગન્ધઃ શુભો મૂત્રપુરીષમલ્પં
યોગપ્રવૃત્તિં પ્રથમાં વદન્તિ ॥ ૧૩॥

યથૈવ બિમ્બં મૃદયોપલિપ્તં

તેજોમયં ભ્રાજતે તત્ સુધાન્તમ્ ।
તદ્વાઽઽત્મતત્ત્વં પ્રસમીક્ષ્ય દેહી
એકઃ કૃતાર્થો ભવતે વીતશોકઃ ॥ ૧૪॥

યદાત્મતત્ત્વેન તુ બ્રહ્મતત્ત્વં
દીપોપમેનેહ યુક્તઃ પ્રપશ્યેત્ ।
અજં ધ્રુવં સર્વતત્ત્વૈર્વિશુદ્ધં
જ્ઞાત્વા દેવં મુચ્યતે સર્વપાપૈઃ ॥ ૧૫॥

એષો હ દેવઃ પ્રદિશોઽનુ સર્વાઃ ।
પૂર્વો હ જાતઃ સ ઉ ગર્ભે અન્તઃ ।
સ એવ જાતઃ સ જનિષ્યમાણઃ
પ્રત્યઙ્ જનાસ્તિષ્ઠતિ સર્વતોમુખઃ ॥ ૧૬॥

યો દેવો અગ્નૌ યોઽપ્સુ
યો વિશ્વં ભુવનમાવિવેશ ।
ય ઓષધીષુ યો વનસ્પતિષુ
તસ્મૈ દેવાય નમો નમઃ ॥ ૧૭॥

તૃતીયોઽધ્યાયઃ ।

ય એકો જાલવાનીશત ઈશનીભિઃ
સર્વાંલ્લોકાનીશત ઈશનીભિઃ ।
ય એવૈક ઉદ્ભવે સમ્ભવે ચ
ય એતદ્ વિદુરમૃતાસ્તે ભવન્તિ ॥ ૧॥

એકો હિ રુદ્રો ન દ્વિતીયાય તસ્થુ-
ર્ય ઇમાઁલ્લોકાનીશત ઈશનીભિઃ ।
પ્રત્યઙ્ જનાસ્તિષ્ઠતિ સઞ્ચુકોચાન્તકાલે
સંસૃજ્ય વિશ્વા ભુવનાનિ ગોપાઃ ॥ ૨॥

વિશ્વતશ્ચક્ષુરુત વિશ્વતોમુખો
વિશ્વતોબાહુરુત વિશ્વતસ્પાત્ ।
સં બાહુભ્યાં ધમતિ સમ્પતત્રૈ-
ર્દ્યાવાભૂમી જનયન્ દેવ એકઃ ॥ ૩॥

યો દેવાનાં પ્રભવશ્ચોદ્ભવશ્ચ

વિશ્વાધિપો રુદ્રો મહર્ષિઃ ।
હિરણ્યગર્ભં જનયામાસ પૂર્વં
સ નો બુદ્ધ્યા શુભયા સંયુનક્તુ ॥ ૪॥

યા તે રુદ્ર શિવા તનૂરઘોરાઽપાપકાશિની ।
તયા નસ્તનુવા શન્તમયા ગિરિશન્તાભિચાકશીહિ ॥ ૫॥

યામિષું ગિરિશન્ત હસ્તે બિભર્ષ્યસ્તવે ।
શિવાં ગિરિત્ર તાં કુરુ મા હિંસીઃ પુરુષં જગત્ ॥ ૬॥

તતઃ પરં બ્રહ્મ પરં બૃહન્તં
યથાનિકાયં સર્વભૂતેષુ ગૂઢમ્ ।
વિશ્વસ્યૈકં પરિવેષ્ટિતાર-
મીશં તં જ્ઞાત્વાઽમૃતા ભવન્તિ ॥ ૭॥

વેદાહમેતં પુરુષં મહાન્ત-
માદિત્યવર્ણં તમસઃ પરસ્તાત્ ।
તમેવ વિદિત્વાતિમૃત્યુમેતિ
નાન્યઃ પન્થા વિદ્યતેઽયનાય ॥ ૮॥

યસ્માત્ પરં નાપરમસ્તિ કિઞ્ચિદ્ય-
સ્માન્નણીયો ન જ્યાયોઽસ્તિ કશ્ચિત્ ।
વૃક્ષ ઇવ સ્તબ્ધો દિવિ તિષ્ઠત્યેક-
સ્તેનેદં પૂર્ણં પુરુષેણ સર્વમ્ ॥ ૯॥

તતો યદુત્તરતરં તદરૂપમનામયમ્ ।
ય એતદ્વિદુરમૃતાસ્તે ભવન્તિ અથેતરે દુઃખમેવાપિયન્તિ ॥ ૧૦॥

સર્વાનન શિરોગ્રીવઃ સર્વભૂતગુહાશયઃ ।
સર્વવ્યાપી સ ભગવાંસ્તસ્માત્ સર્વગતઃ શિવઃ ॥ ૧૧॥

મહાન્ પ્રભુર્વૈ પુરુષઃ સત્વસ્યૈષ પ્રવર્તકઃ ।
સુનિર્મલામિમાં પ્રાપ્તિમીશાનો જ્યોતિરવ્યયઃ ॥ ૧૨॥

અઙ્ગુષ્ઠમાત્રઃ પુરુષોઽન્તરાત્મા
સદા જનાનાં હૃદયે સન્નિવિષ્ટઃ ।
હૃદા મનીષા મનસાભિક્લૃપ્તો
ય એતદ્ વિદુરમૃતાસ્તે ભવન્તિ ॥ ૧૩॥

સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સ ભૂમિં વિશ્વતો વૃત્વા અત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ॥ ૧૪॥

પુરુષ એવેદઁ સર્વં યદ્ ભૂતં યચ્ચ ભવ્યમ્ ।
ઉતામૃતત્વસ્યેશાનો યદન્નેનાતિરોહતિ ॥ ૧૫॥

સર્વતઃ પાણિપાદં તત્ સર્વતોઽક્ષિશિરોમુખમ્ ।
સર્વતઃ શ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ॥ ૧૬॥

સર્વેન્દ્રિયગુણાભાસં સર્વેન્દ્રિયવિવર્જિતમ્ ।
સર્વસ્ય પ્રભુમીશાનં સર્વસ્ય શરણં સુહૃત્ ॥ ૧૭॥

નવદ્વારે પુરે દેહી હંસો લેલાયતે બહિઃ ।
વશી સર્વસ્ય લોકસ્ય સ્થાવરસ્ય ચરસ્ય ચ ॥ ૧૮॥

અપાણિપાદો જવનો ગ્રહીતા
પશ્યત્યચક્ષુઃ સ શ઼ૃણોત્યકર્ણઃ ।
સ વેત્તિ વેદ્યં ન ચ તસ્યાસ્તિ વેત્તા
તમાહુરગ્ર્યં પુરુષં મહાન્તમ્ ॥ ૧૯॥

અણોરણીયાન્ મહતો મહીયા-
નાત્મા ગુહાયાં નિહિતોઽસ્ય જન્તોઃ ।
તમક્રતુઃ પશ્યતિ વીતશોકો
ધાતુઃ પ્રસાદાન્મહિમાનમીશમ્ ॥ ૨૦॥

વેદાહમેતમજરં પુરાણં
સર્વાત્માનં સર્વગતં વિભુત્વાત્ ।
જન્મનિરોધં પ્રવદન્તિ યસ્ય
બ્રહ્મવાદિનો હિ પ્રવદન્તિ નિત્યમ્ ॥ ૨૧॥

ચતુર્થોઽધ્યાયઃ ।

ય એકોઽવર્ણો બહુધા શક્તિયોગાદ્
વરણાનનેકાન્ નિહિતાર્થો દધાતિ ।
વિચૈતિ ચાન્તે વિશ્વમાદૌ ચ દેવઃ
સ નો બુદ્ધ્યા શુભયા સંયુનક્તુ ॥ ૧॥

તદેવાગ્નિસ્તદાદિત્ય-
સ્તદ્વાયુસ્તદુ ચન્દ્રમાઃ ।

તદેવ શુક્રં તદ્ બ્રહ્મ
　　તદાપસ્તત્ પ્રજાપતિઃ ॥ ૨॥

ત્વં સ્ત્રી ત્વં પુમાનસિ
　　ત્વં કુમાર ઉત વા કુમારી ।
ત્વં જીર્ણો દણ્ડેન વઞ્ચસિ
　　ત્વં જાતો ભવસિ વિશ્વતોમુખઃ ॥ ૩॥

નીલઃ પતઙ્ગો હરિતો લોહિતાક્ષ-
　　સ્તડિદ્ગર્ભ ઋતવઃ સમુદ્રાઃ ।
અનાદિમત્ ત્વં વિભુત્વેન વર્તસે
　　યતો જાતાનિ ભુવનાનિ વિશ્વા ॥ ૪॥

અજામેકાં લોહિતશુક્લકૃષ્ણાં
　　બહ્વીઃ પ્રજાઃ સૃજમાનાં સરૂપાઃ ।
અજો હ્યેકો જુષમાણોઽનુશેતે
　　જહાત્યેનાં ભુક્તભોગામજોઽન્યઃ ॥ ૫॥

દ્વા સુપર્ણા સયુજા સખાયા
　　સમાનં વૃક્ષં પરિષસ્વજાતે ।
તયોરન્યઃ પિપ્પલં સ્વાદ્વત્ત્યન-
　　શ્નન્નન્યો અભિચાકશીતિ ॥ ૬॥

સમાને વૃક્ષે પુરુષો નિમગ્નોઽ-
　　નીશયા શોચતિ મુહ્યમાનઃ ।
જુષ્ટં યદા પશ્યત્યન્યમીશમસ્ય
　　મહિમાનમિતિ વીતશોકઃ ॥ ૭॥

ઋચો અક્ષરે પરમે વ્યોમન્
　　યસ્મિન્દેવા અધિ વિશ્વે નિષેદુઃ ।
યસ્તં ન વેદ કિમૃચા કરિષ્યતિ
　　ય ઇત્તદ્વિદુસ્ત ઇમે સમાસતે ॥ ૮॥

છન્દાંસિ યજ્ઞાઃ ક્રતવો વ્રતાનિ
　　ભૂતં ભવ્યં યચ્ચ વેદા વદન્તિ ।
અસ્માન્ માયી સૃજતે વિશ્વમેત-
　　ત્તસ્મિંશ્ચાન્યો માયયા સન્નિરુદ્ધઃ ॥ ૯॥

માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં ચ મહેશ્વરમ્ ।
તસ્યવયવભૂતૈસ્તુ વ્યાપ્તં સર્વમિદં જગત્ ॥ ૧૦॥

યો યોનિં યોનિમધિતિષ્ઠત્યેકો
યસ્મિન્નિદં સં ચ વિચૈતિ સર્વમ્ ।
તમીશાનં વરદં દેવમીડ્યં
નિચાય્યેમાં શાન્તિમત્યન્તમેતિ ॥ ૧૧॥

યો દેવાનાં પ્રભવશ્ચોદ્ભવશ્ચ
વિશ્વાધિપો રુદ્રો મહર્ષિઃ ।
હિરણ્યગર્ભં પશ્યત જાયમાનં
સ નો બુદ્ધ્યા શુભયા સંયુનક્તુ ॥ ૧૨॥

યો દેવાનામધિપો
યસ્મિન્લ્લોકા અધિશ્રિતાઃ ।
ય ઈશે અસ્ય દ્વિપદશ્ચતુષ્પદઃ
કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૧૩॥

સૂક્ષ્માતિસૂક્ષ્મં કલિલસ્ય મધ્યે
વિશ્વસ્ય સ્રષ્ટારમનેકરૂપમ્ ।
વિશ્વસ્યૈકં પરિવેષ્ટિતારં
જ્ઞાત્વા શિવં શાન્તિમત્યન્તમેતિ ॥ ૧૪॥

સ એવ કાલે ભુવનસ્ય ગોપ્તા
વિશ્વાધિપઃ સર્વભૂતેષુ ગૂઢઃ ।
યસ્મિન્ યુક્તા બ્રહ્મર્ષયો દેવતાશ્ચ
તમેવં જ્ઞાત્વા મૃત્યુપાશાંશ્છિનત્તિ ॥ ૧૫॥

ધૃતાત્ પરં મણ્ડમિવાતિસૂક્ષ્મં
જ્ઞાત્વા શિવં સર્વભૂતેષુ ગૂઢમ્ ।
વિશ્વસ્યૈકં પરિવેષ્ટિતારં
જ્ઞાત્વા દેવં મુચ્યતે સર્વપાશૈઃ ॥ ૧૬॥

એષ દેવો વિશ્વકર્મા મહાત્મા
સદા જનાનાં હૃદયે સન્નિવિષ્ટઃ ।
હૃદા મનીષા મનસાભિક્લૃપ્તો

ય એતદ્ વિદુરમૃતાસ્તે ભવન્તિ ॥ ૧૭॥

યદાઽતમસ્તાન્ન દિવા ન રાત્રિઃ
ન સન્નચાસચ્છિવ એવ કેવલઃ ।
તદક્ષરં તત્ સવિતુર્વરેણ્યં
પ્રજ્ઞા ચ તસ્માત્ પ્રસૃતા પુરાણી ॥ ૧૮॥

નૈનમૂર્ધ્વં ન તિર્યઞ્ચં
ન મધ્યે ન પરિજગ્રભત્ ।
ન તસ્ય પ્રતિમા અસ્તિ
યસ્ય નામ મહદ્ યશઃ ॥ ૧૯॥

ન સન્દૃશે તિષ્ઠતિ રૂપમસ્ય
ન ચક્ષુષા પશ્યતિ કશ્ચનૈનમ્ ।
હૃદા હૃદિસ્થં મનસા ય એન-
મેવં વિદુરમૃતાસ્તે ભવન્તિ ॥ ૨૦॥

અજાત ઇત્યેવં કશ્ચિદ્ભીરુઃ પ્રપદ્યતે ।
રુદ્ર યત્તે દક્ષિણં મુખં તેન માં પાહિ નિત્યમ્ ॥ ૨૧॥

મા નસ્તોકે તનયે મા ન આયુષિ
મા નો ગોષુ મા ન અશ્વેષુ રીરિષઃ ।
વીરાન્ મા નો રુદ્ર ભામિતો
વધીર્હવિષ્મન્તઃ સદામિત્ ત્વા હવામહે ॥ ૨૨॥

પઞ્ચમોઽધ્યાયઃ ।

દ્વે અક્ષરે બ્રહ્મપરે ત્વનન્તે
વિદ્યાવિદ્યે નિહિતે યત્ર ગૂઢે ।
ક્ષરં ત્વવિદ્યા હ્યમૃતં તુ વિદ્યા
વિદ્યાવિદ્યે ઈશતે યસ્તુ સોઽન્યઃ ॥ ૧॥

યો યોનિં યોનિમધિતિષ્ઠત્યેકો
વિશ્વાનિ રૂપાણિ યોનીશ્ચ સર્વાઃ ।
ઋષિં પ્રસૂતં કપિલં યસ્તમગ્રે
જ્ઞાનૈર્બિભર્તિ જાયમાનં ચ પશ્યેત્ ॥ ૨॥

એકૈક જાલં બહુધા વિકુર્વ-

ન્નસ્મિન્ ક્ષેત્રે સંહરત્યેષ દેવઃ ।
ભૂયઃ સૃષ્ટ્વા પતયસ્તથેશઃ
સર્વાધિપત્યં કુરુતે મહાત્મા ॥ ૩॥

સર્વા દિશ ઊર્ધ્વમધશ્ચ તિર્યક્
પ્રકાશયન્ ભ્રાજતે યદ્વનડ્વાન્ ।
એવં સ દેવો ભગવાન્ વરેણ્યો
યોનિસ્વભાવાનધિતિષ્ઠત્યેકઃ ॥ ૪॥

યચ્ચ સ્વભાવં પચતિ વિશ્વયોનિઃ
પાચ્યાંશ્ચ સર્વાન્ પરિણામયેદ્ યઃ ।
સર્વમેતદ્ વિશ્વમધિતિષ્ઠત્યેકો
ગુણાંશ્ચ સર્વાન્ વિનિયોજયેદ્ યઃ ॥ ૫॥

તદ્ વેદગુહ્યોપનિષત્સુ ગૂઢં
તદ્ બ્રહ્મા વેદતે બ્રહ્મયોનિમ્ ।
યે પૂર્વં દેવા ઋષયશ્ચ તદ્ વિદુ-
સ્તે તન્મયા અમૃતા વૈ બભૂવુઃ ॥ ૬॥

ગુણાન્વયો યઃ ફલકર્મકર્તા
કૃતસ્ય તસ્યૈવ સ ચોપભોક્તા ।
સ વિશ્વરૂપસ્ત્રિગુણસ્ત્રિવર્ત્મા
પ્રાણાધિપઃ સઞ્ચરતિ સ્વકર્મભિઃ ॥ ૭॥

અઙ્ગુષ્ઠમાત્રો રવિતુલ્યરૂપઃ
સઙ્કલ્પાહઙ્કારસમન્વિતો યઃ ।
બુદ્ધેર્ગુણેનાત્મગુણેન ચૈવ
આરાગ્રમાત્રોઽપ્યપરોઽપિ દૃષ્ટઃ ॥ ૮॥

બાલાગ્રશતભાગસ્ય શતધા કલ્પિતસ્ય ચ ।
ભાગો જીવઃ સ વિજ્ઞેયઃ સ ચાનન્ત્યાય કલ્પતે ॥ ૯॥

નૈવ સ્ત્રી ન પુમાનેષ ન ચૈવાયં નપુંસકઃ ।
યદ્યચ્છરીરમાદત્તે તેને તેને સ યુજ્યતે ॥ ૧૦॥

સઙ્કલ્પનસ્પર્શનદૃષ્ટિમોહૈ-
ર્ગ્રાસામ્બુવૃષ્ટ્યાત્મવિવૃદ્ધિજન્મ ।

કર્માનુગાન્યનુક્રમેણ દેહી
    સ્થાનેષુ રૂપાણ્યભિસમ્પ્રપદ્યતે ॥ ૧૧॥

સ્થૂલાનિ સૂક્ષ્માણિ બહૂનિ ચૈવ
    રૂપાણિ દેહી સ્વગુણૈર્વૃણોતિ ।
ક્રિયાગુણૈરાત્મગુણૈશ્ચ તેષાં
    સંયોગહેતુરપરોઽપિ દૃષ્ટઃ ॥ ૧૨॥

અનાદ્યનન્તં કલિલસ્ય મધ્યે
    વિશ્વસ્ય સ્રષ્ટારમનેકરૂપમ્ ।
વિશ્વસ્યૈકં પરિવેષ્ટિતારં
    જ્ઞાત્વા દેવં મુચ્યતે સર્વપાશૈઃ ॥ ૧૩॥

ભાવગ્રાહ્યમનીડાખ્યં ભાવાભાવકરં શિવમ્ ।
કલાસર્ગકરં દેવં યે વિદુસ્તે જહુસ્તનુમ્ ॥ ૧૪॥

ષષ્ઠોઽધ્યાયઃ ।

સ્વભાવમેકે કવયો વદન્તિ
    કાલં તથાન્યે પરિમુહ્યમાનાઃ ।
દેવસ્યૈષ મહિમા તુ લોકે
    યેનેદં ભ્રામ્યતે બ્રહ્મચક્રમ્ ॥ ૧॥

યેનાવૃતં નિત્યમિદં હિ સર્વં જ્ઞઃ
    કાલકારો ગુણી સર્વવિદ્ યઃ ।
તેનેશિતં કર્મ વિવર્તતે હ
    પૃથિવ્યપ્તેજોનિલખાનિ ચિન્ત્યમ્ ॥ ૨॥

તત્કર્મ કૃત્વા વિનિવર્ત્ય ભૂય-
    સ્તત્ત્વસ્ય તાવેન સમેત્ય યોગમ્ ।
એકેન દ્વાભ્યાં ત્રિભિરષ્ટભિર્વા
    કાલેન ચૈવાત્મગુણૈશ્ચ સૂક્ષ્મૈઃ ॥ ૩॥

આરભ્ય કર્માણિ ગુણાન્વિતાનિ
    ભાવાંશ્ચ સર્વાન્ વિનિયોજયેદ્યઃ ।
તેષામભાવે કૃતકર્મનાશઃ
    કર્મક્ષયે યાતિ સ તત્ત્વતોઽન્યઃ ॥ ૪॥

આદિઃ સ સંયોગનિમિત્તહેતુઃ
પરસ્ત્રિકાલાદકલોઽપિ દૃષ્ટઃ ।
તં વિશ્વરૂપં ભવભૂતમીડ્યં
દેવં સ્વચિત્તસ્થમુપાસ્ય પૂર્વમ્ ॥ ૫॥

સ વૃક્ષકાલાકૃતિભિઃ પરોઽન્યો
યસ્માત્ પ્રપઞ્ચઃ પરિવર્તતેઽયમ્ ।
ધર્માવહં પાપનુદં ભગેશં
જ્ઞાત્વાત્મસ્થમમૃતં વિશ્વધામ ॥ ૬॥

તમીશ્વરાણાં પરમં મહેશ્વરં
તં દેવતાનાં પરમં ચ દૈવતમ્ ।
પતિં પતીનાં પરમં પરસ્તાદ્-
વિદામ દેવં ભુવનેશમીડ્યમ્ ॥ ૭॥

ન તસ્ય કાર્યં કરણં ચ વિદ્યતે
ન તત્સમશ્ચાભ્યધિકશ્ચ દૃશ્યતે ।
પરાસ્ય શક્તિર્વિવિધૈવ શ્રૂયતે
સ્વાભાવિકી જ્ઞાનબલક્રિયા ચ ॥ ૮॥

ન તસ્ય કશ્ચિત્ પતિરસ્તિ લોકે
ન ચેશિતા નૈવ ચ તસ્ય લિઙ્ગમ્ ।
સ કારણં કરણાધિપાધિપો
ન ચાસ્ય કશ્ચિજ્જનિતા ન ચાધિપઃ ॥ ૯॥

યસ્તન્તુનાભ ઇવ તન્તુભિઃ પ્રધાનજૈઃ સ્વભાવતઃ ।
દેવ એકઃ સ્વમાવૃણોતિ સ નો દધાતુ બ્રહ્માપ્યયમ્ ॥ ૧૦॥

એકો દેવઃ સર્વભૂતેષુ ગૂઢઃ
સર્વવ્યાપી સર્વભૂતાન્તરાત્મા।
કર્માધ્યક્ષઃ સર્વભૂતાધિવાસઃ
સાક્ષી ચેતા કેવલો નિર્ગુણશ્ચ ॥ ૧૧॥

એકો વશી નિષ્ક્રિયાણાં બહૂના-
મેકં બીજં બહુધા યઃ કરોતિ ।
તમાત્મસ્થં યેઽનુપશ્યન્તિ ધીરા-
સ્તેષાં સુખં શાશ્વતં નેતરેષામ્ ॥ ૧૨॥

નિત્યો નિત્યાનાં ચેતનશ્ચેતનાના-
મેકો બહૂનાં યો વિદધાતિ કામાન્ ।
તત્કારણં સાઙ્ખ્યયોગાધિગમ્યં
જ્ઞાત્વા દેવં મુચ્યતે સર્વપાશૈઃ ॥ ૧૩॥

ન તત્ર સૂર્યો ભાતિ ન ચન્દ્રતારકં
નેમા વિદ્યુતો ભાન્તિ કુતોઽયમગ્નિઃ ।
તમેવ ભાન્તમનુભાતિ સર્વં
તસ્ય ભાસા સર્વમિદં વિભાતિ ॥ ૧૪॥

એકો હંસઃ ભુવનસ્યાસ્ય મધ્યે
સ એવાગ્નિઃ સલિલે સંનિવિષ્ટઃ ।
તમેવ વિદિત્વા અતિમૃત્યુમેતિ
નાન્યઃ પન્થા વિદ્યતેઽયનાય ॥ ૧૫॥

સ વિશ્વકૃદ્ વિશ્વવિદાત્મયોનિ-
ર્જ્ઞઃ કાલકાલો ગુણી સર્વવિદ્ યઃ ।
પ્રધાનક્ષેત્રજ્ઞપતિર્ગુણેશઃ
સંસારમોક્ષસ્થિતિબન્ધહેતુઃ ॥ ૧૬॥

સ તન્મયો હ્યમૃત ઈશસંસ્થો
જ્ઞઃ સર્વગો ભુવનસ્યાસ્ય ગોપ્તા ।
ય ઈશેઽસ્ય જગતો નિત્યમેવ
નાન્યો હેતુર્વિદ્યત ઈશનાય ॥ ૧૭॥

યો બ્રહ્માણં વિદધાતિ પૂર્વં
યો વૈ વેદાંશ્ચ પ્રહિણોતિ તસ્મૈ ।
તં હ દેવં આત્મબુદ્ધિપ્રકાશં
મુમુક્ષુર્વૈ શરણમહં પ્રપદ્યે ॥ ૧૮॥

નિષ્કલં નિષ્ક્રિયં શાન્તં નિરવદ્યં નિરઞ્જનમ્ ।
અમૃતસ્ય પરં સેતું દગ્ધેન્દનમિવાનલમ્ ॥ ૧૯॥

યદા ચર્મવદાકાશં વેષ્ટયિષ્યન્તિ માનવાઃ ।
તદા દેવમવિજ્ઞાય દુઃખસ્યાન્તો ભવિષ્યતિ ॥ ૨૦॥

તપઃપ્રભાવાદ્ દેવપ્રસાદાચ્ચ
    બ્રહ્મ હ શ્વેતાશ્વતરોઽથ વિદ્વાન્ ।
અત્યાશ્રમિભ્યઃ પરમં પવિત્રં
    પ્રોવાચ સમ્યગૃષિસઙ્ઘજુષ્ટમ્ ॥ ૨૧॥

વેદાન્તે પરમં ગુહ્યં પુરાકલ્પે પ્રચોદિતમ્ ।
નાપ્રશાન્તાય દાતવ્યં નાપુત્રાયાશિષ્યાય વા પુનઃ ॥ ૨૨॥

યસ્ય દેવે પરા ભક્તિઃ યથા દેવે તથા ગુરૌ ।
તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ ॥ ૨૩॥

પ્રકાશન્તે મહાત્મન ઇતિ ।

ॐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
    તેજસ્વિ નાવધીતમસ્તુ । મા વિદ્વિષાવહૈ ॥

ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded and proofread by Sunder Hattangadi
Proofread by John Manetta

---

*Shvetashvatara Upanishad*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*